# राष्ट्रभाषा संस्कृतम्

## अथवा

# संस्कृतभाषायाः महत्त्वम्

---

संस्कृतभाषेयं सर्वास्वपि विश्वभाषासु प्राचीनतमा नास्त्यत्र कश्चिद् विसंवादः । विश्वस्मिन् अस्मिन्विश्वे लब्धप्रचुरप्रचारा ग्रीकलैटिनाद्या-भाषा संस्कृतभाषापेक्षया पश्चादुद्भूवा इति भाषातत्त्वविदां सर्वसम्मतं मतम् ।

केयं संस्कृतभाषा प्रश्नोऽयं स्वभावतः समुज्जृम्भते साम्प्रतम् ? भाषान्तर-विलक्षणैर्विशिष्टैः प्रकृति प्रत्ययादि संस्कारविशेषैः संस्कृतत्वादियं किलसंस्कृतभाषेति अन्वर्थ संज्ञां लेभे । सम् उपसर्गपूर्वकात् कृ धातोर्निष्पन्नोऽयं संस्कृतशब्दः, भाषाया अस्या प्रकृति प्रत्ययादि संस्करणाधानत्वं स्फुटं सूचयति ।

सर्वविदितमेवात्र यत् संस्कृतं हि नाम दैवीवाक् । सेयं देवैर्विद्वभिः व्यवह्रियमा-णत्वाद्देवभाषेत्युच्यते—"विद्वांसो वै देवा इत्युक्तेः ।" उक्तञ्च—"संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः ।" तथा च—"भाषासु मधुरा मुख्या दिव्या गीर्वाण भारती" ।

भाषणाद् हि भाषा भवति, भाष्यते भाषणादिव्यवहारोऽनुष्टीयते यया सा भाषा इति व्युत्पत्तेः । भाषेयं किल पुरा भाषणलेखनादिष्वपि व्यवहृता आसीत् । तद्यथा-रामायण-महाभारतकाले संस्कृतभाषा जनसाधारण-वार्तालाप-भाषा । दृश्यते रामायणे इल्वलोराक्षसः ब्राह्मणरूपं धृत्वा संस्कृतेनैव विप्रानामन्त्रयन् । हनुमतापि सीताशोध-प्रसंगेन अशोकोपवनं प्रविश्य संस्कृत एव सीतया सह वार्तालापः कृतः ।

**यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् ।**
**रावणं मन्यमाना मां सीता भीता भविष्यति ॥**

यास्केनापि निर्दिष्टं वैदिकेतरसंस्कृतं 'भाषा' इतिसमाख्यया, येन सूच्यते संस्कृतस्य जनवार्तालापभाषा स्वरूपत्वम् । पाणिनिना अभिहितं संस्कृतं लौकिकमिति नाम्ना । दूरादाह्वानादि विषयेषु तत्कृताः व्याकरणनियमाः अपि प्रकटयन्ति संस्कृतस्य लोक व्यवहृतस्वरूपम् । डाक्टर भाण्डारकरमहोदयैः प्रमाणीकृतं यद्, ईसवीयपूर्वद्वितीय-शताब्द्याम् आसीत् हिमवद्विन्ध्यमध्यवर्तिनः निखिलस्यापि प्रदेशस्य लोकभाषा । अवलो-

यते महाभाष्ये एकः सारथिः एकेन वैयाकरणेन सह 'सूत' शब्दस्य व्युत्पत्तिमवलम्ब्य विवदमानः। संस्कृतस्य नाटक साहित्यनिर्माणमपि सूचयति जनतायाः संस्कृत-परिज्ञानाभिज्ञताम्। प्राचीनकाले जिज्ञासायां भगवता शङ्कराचार्येण प्रश्ने कृते सति प्राकृताभिर्नारीभिरपि तदुत्तरमित्थं प्रदत्तम्—

**स्वतः प्रमाणं परतः प्रमाणं कीराङ्गना यत्र गिरं गिरन्ति।**
**द्वारस्थनीडान्तरसन्निरुद्धाः जानीहि तन्मण्डनपण्डितौकः॥**

अपि च बहुधा अनुश्रूयते—

**न वदेद्यावनीं भाषां प्राणैः कण्ठगतैरपि।**

इत्यादि प्रमाणैर्ध्वन्यते यद् भाषेयं पुराऽऽसीद् व्यवहारभाषा।

नहि केवलमासीद् भारते एव संस्कृतं जनभाषापदासीनम्; किन्तु प्रसरितं संस्कृतमिदं भारतस्य अन्येष्वपि उपनिवेशेषु। श्री जयचन्द्रविद्यालङ्कार महोदयैः प्रकटीकृतं मतमिदं यद् आसीत् संस्कृतं राजभाषापदासीनम्। विद्यते अस्मांक सुदृढं मतं यत् यदि अद्यापि क्रियते संस्कृतं राष्ट्रभाषापदासीनं तर्हि भवेत् परिवर्तिमामूलचूलतः राष्ट्रस्वरूपम्, समाप्तिमागतश्च स्यात राष्ट्र भाषावादविवादः।

सकलभुवनललामभूतेयं, समस्तज्ञानराशीनां साम्राज्ञी संस्कृतभाषा न केवलं भूतल एवापितु लोकत्रयेऽपि पवित्रतातिरेक सम्पादिकेति प्रथितकीर्तिः गीर्वाणवाणी-विलासप्रणयिनां विदुषां हृदयोपरि विराजमाना मुक्तिप्रदायिनीति प्रथितयशोऽवदाना सकलतीर्थानामेकमायतनम्। विद्याश्रियो मातृदर्शनम्, भवनं सुसाहित्यस्य, आस्पदं साधुतायाः, आकरो ज्ञानस्य, निधानं वैचित्र्यस्य, कस्य न विदिता सचेतसः। तद्यथा—उक्तम् केनापि कविना—

**अस्माकं सकलं जगद्धितकरं साहित्य सौहित्यकम्।**
**तत्वं सांस्कृतिकं निसर्गमधुरं सत्यंशिवं सुन्दरम्॥**
**साङ्गोपाङ्ग समस्त-वाङ्मयकलाशिल्पादि सम्भूषितम्।**
**श्रौतस्मार्तमयेसुवर्णकलशेऽस्मिन् राजते सम्भृतम्॥**

नास्त्यत्र कापि विचिकित्सा यत् भारतवर्षीय प्राचीनं साहित्यम्, निखिलमपि ज्ञानविज्ञानमस्यामेव भाषायामेवोपनिबद्धम्। तद्यथा—

"अपौरुषेया वेदा ऋषिभिः प्रणीता अध्यात्मज्ञानोपदेशिका उपनिषदः गौतम-व्यास-कणादाभिलिखितं दर्शनषटकं शिक्षाकल्पव्याकरणनिरुक्त छन्दो ज्योतिषञ्चा-ङ्गानि, पुराणन्यायमीमांसाधर्मशास्त्रादीन्युपाङ्गानि, आयुर्वेद-धनुर्वेद-गन्धर्ववेदार्थ-शास्त्रादयः उपवेदास्मृतयः रामायण-महाभारतादि अनुपमाः ग्रन्थाः अनुपमां संस्कृत-भाषामेवालंकुर्वन्ति।" "कोहि नाम संस्कृतज्ञो हिन्दीभाषा कोविदो वा तेषां सकल-साहित्यनिगूढतत्वविदां मम्मटविश्वनाथजगन्नाथ प्रभृतीनां तथा कालिदास भवभूतिमाघ-भारवीश्रीहर्षजयदेव बाणभट्टदण्ड्यादीनां प्रथितप्रचुरयशसां संस्कृतकवीनाञ्च नामानि न जानाति, येषां काव्यपद पदार्थनिरूपणभावपूर्णोऽतिगम्भीरो विचारः येषाञ्च-

मानससरोवर समुद्भूतानि विविधरसभावमयमकरन्द परागपूर्णानि कविताकनककमलानि-सोल्लासं विकासमासाद्य पृथिव्यां सर्वेषामेव सचेतसां चेतांसि चमत्कुर्वन्ति विराजन्ते ।" जगत्यस्मिन् सन्ति शतशोसहस्रशोवा विघ्नाः अस्माकं सर्वकार्याणामन्तरायभूता तेषा-मुपशमनाय भारतीय ऋषिभिर्महर्षिभिश्च दृश्यते अनेन इति दर्शनम् व्युत्पत्या न्याय-वैशेषिक सांख्ययोगमीमांसा वेदान्तादीनां दर्शनानां सत्ता पूर्वतः प्रकाशिता ।

साहित्यसङ्गीतकलापेक्षया एवञ्च तद् व्यापकताद्दृष्ट्या संस्कृतसाहित्यं सर्वाङ्ग-पूर्णम्, अतः संस्कृतसाहित्यविषये नाट्यशास्त्रीय—

न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला ।
न स योगो न तत्कर्म यन्नाट्येऽस्मिन्न दृश्यते ॥

कथनं सुसंगतमेव । अन्येषामपि ज्ञानानां विज्ञानानाञ्चायुर्वेदादीनां राजनीति दण्डनीत्यर्थनीत्यादीनां सत्ता अत्र चकास्ते । अतः तमुद्दिश्य—

'यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्' ।

कथनमेतद् सुसङ्गतमेव प्रतिभाति ।

"भाषा-दृष्ट्या एषा संस्कृतभाषा खलु अन्वर्थतां प्रकाशयति सर्वतः । यतो हि एषा-व्याकरणदोषादिरहिता व्यवस्थित-क्रिया-कारक-विभाग समन्विता तथा भाषायाः भूषणभूताः शोभाधायकाः अलङ्करणमलङ्कारा यथा अस्यां भाषायां समुल्लसन्ति नान्यस्यां कस्यामपि भाषायां तथा समुल्लसन्ति ।

शब्द कोष-दृष्ट्या एषा अतीवोच्चतमं पदमधितिष्ठति । यथा आङ्गलभाषायां सूर्य जल धूलिश्चन्द्रवाचकः शब्दः एक-एक एव, परं अस्यां एकस्य वस्तुनो अनेकानि नामानि सन्ति । तद्यथा स्थालीपुलकन्यायेन सूर्यपर्यायवाचिनः शब्दाः एकाधिकं शतं शब्दाः अस्यां भाषायां विलसन्ति ।

वर्णमाला-लिपिदृष्ट्या एषा भाषा वैज्ञानिकी विद्योततेचाऽतितराम्-यथा आङ्गलभाषायां चकार-धकार-ठकार-छकारथकारेत्यादीनां षड्विंश वर्णानामभावाद् केवलं षड्विंश एव वर्णाः सन्ति । एवमेव फ्रेञ्चादीनां भाषाणामपि वर्णमाला लिपि-दृष्ट्या खलु दीना अवस्था जगत्प्रसिद्धा एव ।

उच्चारणदृष्टया आंगलभाषायां लिख्यतेऽन्यत् पठ्यते चायन्त तथा But बुट लिख्यते पठ्यते च 'बट' । Walk वाल्क लिख्यते उच्चते च 'वाक' । Right रिघट लिख्यते उच्यते च 'राइट' । एवमेव सहस्त्रशः शब्दानामवस्था येषां लेखनमन्यादृशं उच्चारणञ्चान्यादृश । ईदृशं वर्णवैकल्यं नाम किन्नास्त्युपहासास्पदं । परं संस्कृत-भाषायां यल्लिख्यते तदेवोच्चार्यते ।

भाषाविज्ञानदृष्ट्या एषा भाषा महत्त्वपूर्णा । भाषाविज्ञान क्षेत्रे संस्कृतभाषायाः परिचयानन्तरमेवाभूतपूर्व क्रान्तिः संजाता । परिणामतः तुलनात्मक भाषाविज्ञानस्य प्रादुर्भावः जातः । तथा च भारोपीय (Indo-European) भाषाणामध्ययनाय अस्याः महत्त्वमत्यावश्यकम् ।"